कालीसहस्रनाम

४६६

१७ पत्राणि

पुराण

श्लोक
३००

१९७

कालीकहस्तनाटिका

पउतपुस्तकं

ॐ श्रीगुरवे नमः ॥ कैलासशिखरे देवी शंकरं पप्रच्छ ॥ कैलासे किंनृते रम्ये रमणीये नानारत्नविभूषिते नानावृक्षलतयाकीर्णे नानापक्षिरवैर्युते चतुर्म्मे उपसंयुक्ते चतुर्म्मंडलेति क्वचित् पाठः ॥ शृंगारमंडपे विहारार्थकमंडपे रन्विते शंकरं किंभूतं समाधौ संस्थितं समाधिर्न्नाध र्म्मचिन्ते त्समरः ॥ पुनः कीदृशः श्रान्तं योगिनां प्रियं मौनव्रतधरं ॥ श्रीदेव्युवाच ॥ हे नाथ किं त्वया जप्यते किं स्मर्य्यते सृष्टिः कुत्र विलीनास्ति मिथ्थिता भवतीति पुनः कुतो जायते ब्रह्मांडकारणं किं आद्यं महत्कारणं वा किं महतां सृष्टिस्थितिप्रलयकर्त्तॄणां ब्रह्मादीनां कारणं ॥ मनोरथमयी सिद्धिः केन कर्म्मणा कस्माद्भवतीति एवं वांछामयी वांछान्मिका सिद्धिः कस्मात् केन वा भवतीति ॥ कल्पना सिद्धिः सिद्धिविशेषो महान् केन भवतीति ॥ ए

क्षिपालादशकं अष्टादशशास्त्रानुग्रहः केनवाभवतीति एवंचराचरपुंस्त्री[illegible]: वि
केनवाभवतीति माहेन्द्रजालेन्द्रजालकांतारचनासामर्थ्यं केनवाभवतीति एवमणि
णिमाद्यष्टकसिद्धिः खेचरसिद्धिश्च केनभवतीति एवंपरकायप्रवेशानंनवी
नसृष्टिकरणं समुद्रशोषणं अमायांचंद्रदर्शनं दिवाचंद्रप्रकाशानं अष्टदिक्षु
चंद्राष्टककरणंसामर्थ्यंन तथाष्टसुदिक्षु सूर्याष्टककरणसामर्थ्यं शिवेतिसंबो
धनंपदं केनभवतीति सर्वत्रान्वयः जले जलमयस्तंजलमध्ये जलस्तंभं
कृत्वा जलरूपेण स्थातुं शक्यते केन एवं वह्निमध्ये वह्निस्तंभं कृत्वा वह्नि
रूपेण केनवा स्थातुं शक्यते एवं ब्रह्मादीनां निर्माणसामर्थ्यं इंद्रादी
नांच केन वेति एवं पादुकासिद्धिर्गुटिकासिद्धिर्यक्षिणीसिद्धिर्वेताल
पंचकसिद्धिः केनकर्मणाभवतीति एवंरसायनमंजनं विनाप्यात्मसं
गोपनं एवं महामधुमतीसिद्धिः पद्मावतीसिद्धिश्च केनभवतीति एवं

यावंत्यः सर्वाः सिद्धयः केन कर्मणा भवंतीति पापसमाकुले कलौ के
न मंत्रेण केन तपसा सिद्ध्यतीति कलौ किंभूतेन आ[illegible] प्रत्यय रहिते
सर्वं एतद्घघडुक्तं तद्दूद श्रीशिव उवाच। विनामंत्रमित्यादि मंत्रं विना न
तपसा विना ध्यानं विना यंत्रं विना पूजादिकं विना बलिदानं विना न्या
सं विना भूतशुद्धिं विना क्लेशं विना देहदुःखादिभिर्विना आशु शी
२ घ्रं सिद्धिर्येन भवतीति न देव मया कथ्यते अथ च अन्ये ब्रह्माण्डगो
ले तितिपरब्रह्मस्थानं ब्रह्माण्डवहिर्देशस्थितं अन्यपरहोपप
नेः आदि स्वर्गमिति आदि स्वर्गेति यावत् न देव तारा ब्रह्मरूपा तारा

॥ जपादेरावर्त्तते ज्ञानाद्यापं समाचरेत्। षडङ्गन्यासं समाचर्य मुखशोधनमाचरेत्। ज्ञानात् योगं ततः कुर्यात् मायया
साधकोत्तमः ततः सूतकमुक्त्यर्थं मलावेनचदीपना। निर्वाणं च ततो जप्त्वा यानि [illegible] विना न वेता। मंत्रार्थं मंत्रचैतन्यं
कुर्यात्ते नैव वर्त्म नाम महासेतुर्विशुद्धिरेहदि सेतुं समाचरेत्। एवं क्रमेव सारो हेय चेद्धं जपमाचरेत्

त्मिका आद्या भवतीति॥ नित्यानित्यानन्दमयी शून्ये शून्यमंडले स्थिता पंचाश
न्मातृकान्तर्गतशून्यमध्यगते एषु स्थानेषु स्थिता तारात्मिका ब्रह्मरूपा पंच
प्रपंचिता विस्तारिता सर्वा सर्वस्वरूपा। प्रकृतिपुरुषरूपा सती। अनन्तकोटि
ब्रह्मांडगोले स्थिता अन्ते प्रलयसमये ब्रह्मादयः सुराः स्थावरजंगमाद्याश्च
सर्वे महाकाले मिश्रिता भवति। साद्या तं महाकालं संग्रस्य कालीति विख्याता
शून्ये अनन्तकोटिब्रह्मांडबहिर्देशस्थानादिस्वर्गे स्थिता। पुनः सृष्ट्यादिकरणेच्छा
यदि भवति तदा पूर्ववत् सृजति पुनः सर्वे तत्रैव लीनाः प्रादुर्भावश्च ततः। काल
संग्रसनात् काली कालग्रासं कुरोत्युते द्यादिदर्शनाच्चेति। अनन्तकोटिब्रह्मां
डं राजदन्ताग्रे स्थितं। राजदन्तं मध्यस्य प्रधानदन्तं। केषांचिन्मते प्रधानदन्त

हृद्यं तदग्रे अनन्तकोटिब्रह्माण्डं स्थितमिति। ध्यायेति आत्मनं कालग्रासात् रक्ष्य
वर्णं कृत्स्नत्वं विधाय प्रलये ध्याय प्रशून्यालयं प्राप्य महानिर्गुणरूपा परमब्र
3 ह्मरूपा ब्रह्मादयो योगिनश्चरचरा यस्या महिमानं वक्तुं न शक्नुवन्ति वाचा
इत्युपलक्षणं मनसा ध्यानयोगेन। चिन्तनासमर्थाः अतो वाङ्मनसयोरगोच
रत्वमिति प्रतिपादिता। ध्याय ध्यां स्थिरपदं निश्चलमिति यावत् विनाशाविरहात्
। ब्रह्माण्डादयः सर्वे विनश्यन्ति पुनराविर्भूताश्च। केवलमादिस्वर्गस्य स्थिर
त्वं ब्रह्मस्थानत्वात्॥ एवंभूता परमा सर्वोत्कर्षा कला शक्तिरूपा आद्या
कौउया कौउर्थविहारायेति यावत्। शून्यरूपं ब्रह्मरूपं मन्तारं अर्थात् स्व
देहान्निर्गमय्य प्रकल्पयेत् प्रकल्पितवती। नमाद्या ब्रह्मरूपया सृष्ट्वा रंभ ३

समये आत्मनश्छायारूपा सा छाया शक्तिर्ज्जाता। मां छेसुं दरि प्राणवल्ल
भे त्रैलोक्ये त्वादि सम्बोधन पदं मन्तव्यम्। किंवत्प्रकाशम्मम ज्ञानभाग्या
ब्रह्मशरीरजातत्वात्तेजोरूपत्वाज्जलादौ सर्व्वशरीराणांप्रति रूपदर्शनं एवं तीरस्थवृ
क्षादीनां प्रति रूपं जलमध्ये दर्शनं एवं सर्वेषां स्थावरजंगमादीनां छायाशक्तिर
भूदिति। देवी शक्तिरियं छायात्मब्रह्मदेहाद्विनिर्गतेति ब्रह्मस्वात्मत्वात्॥ या देवी स
र्वभूतेषु छायारूपेण संस्थितेति। मार्कंडेयपुराणात्। सा छायारूपा शक्तिर्ज्जा
ता इच्छाख्या शक्तिरभूदिति। तयाइच्छाख्यया शक्त्या कालो महाकालो निर्मितः
। तयाइच्छाख्यया शक्त्या तत्रात्मनः प्रतिबिंबं दृष्टं तदा सा ज्ञानाभिधा ज्ञानाख्या
शक्तिरभूत्॥ तदा तस्मिन्काले दृष्टं एतज्ज्ञानं किं विशिष्टं इति विज्ञानं विजानाति

४ यस्तानंदइच्छाशक्तितो यदा जातं तदा तदिच्छातः क्रियानिर्वाक्रियाख्या शक्तिर्जाता
। ताजदन्तस्थितं यत्तत् सर्वं साक्रियात्रस्तांउ गोलके स्वस्वस्थानक्रमेण स्था
५ पयामास ॥ तत्रैव स्वेच्छापति स्वेच्छायात तत्रैव तदिच्छाकल्पते यथावदवधारये
ति ॥ युगादौ समये परगुणोत्तरं उत्कर्षगुणयुक्तं तदिच्छया सहनिर्गुणं शान्तं
सच्चिदानन्दं विग्रहं शाश्वतं नित्यं सुंदरं शुद्धं सर्वदेवस्तुतं वरं श्रेष्ठं आदिनाथं गु
णातीतं कान्यासंस्तुतमीश्वरं शिवं विपरीतरतं विपरीतरतासक्तं सदानन्द
मयं साम्यरूपं सर्वोत्कर्षं सदानन्दे साम्यरूपं साम्यरूपां महारास समम
ले साम्यरूपं च सर्वोत्कर्षे त्रिलिंगकमितिरमसः । सदा तिरहस्यस्तुरूपूजा
र्थं देवा गंधर्वा अप्सरसां गणाः अप्सरसां समूहाः आगताः इच्छाशिवमिति क ४

थयामासेति भावः। ततः शिवः पक्षिणीं किन्नरीमन्यांश्च अप्सरसं च उर्वश्याद्यां
तिलोत्तमां च वीक्ष्य तन्मायया कान्त्या मायया पानि मग्नः सन् तां प्राह हे सुंदरि
प्राणवल्लभे त्रैलोक्ये त्यादि सम्बोधन पदं। न वत्याद्याः किमत्रागताः मम म
हान् भाग्यार्णवः। ततो प्सरोगणा मौन धरं शिवं पूजयन्ति पूजयामासुः उ
क्त्वा यथायोग्य प्रत्युत्तरं विधायेति॥ अप्सरसं ऊचुः हे देव विश्वजन प्रियत्वया
संहारणं तारितं॥ एवं सृष्टेवारम्भ कार्य्यार्थ मस्युक्तोसि हे देव महाप्रभो वेश्या
कृत्यमिदं मंगलार्थं प्रकर्षेण गायनं प्रयाण समये यात्रा समये उत्सवकाले
मंगल कर्म्माणि समारंभ प्रयाणां मंगलार्थमेव। युगाद्यारंभकाले च हे मृड शंक
र श्रवरूपमहादेव इंद्राणी कोदयः सन्ति तस्याः प्रसवविन्दवत प्रसूतिन्त स्तवत

ब्रह्मांडादयः कोटिकोटयः तत्र युगाद्यारंभ समये समुद्भवा उत्पत्तुः सामर
५ सानन्दर्शनार्थमेवेति। देवाः संप्राप्ता आगता अस्माकं सौख्य सागरः कामि
नीनांरतिर्हित्वा अन्यत् सौख्यं ओत्सुक्यमिति क्वचित् पाठः नास्तीति। महत्सौ
ख्यार्थिका सा रतिरस्माभि र्दृश्यते एवमेव भर्तृभिः सहास्माभिः कर्तव्यमेवेति
। भर्तृणेति क्वचित् पाठोपि। एवं श्रुत्वेति महादेवस्तासामेवं वचः श्रुत्वा ध्याना
वस्थितमानसोपि तस्याः कालिकाया मोहितः सन् कालिकां प्रतिप्रोवाच। हे
कालिमुंडप्रिये भैरवनादिनी। शिवारूपधरे इत्यादि सम्बोधनपदं। ते तवा
गतः सुन्दर्य्यः सन्तीति शेषः। सुन्दरी एषां दर्शनं कर्म्म दर्शनं रूपं कर्म्म कुरु हे
कालप्रिये शिवे ध्यानं मुंचताः सुन्दर्य्यः स्वगृहं प्रतिगच्छन्तीति तवरूपं महाका ५

त्वत्प्रियमेव एतासां सुंदरं रूपं त्रैलोक्यप्रियकारकमिति। एवं मायामुमाविष्टः स
न्महाकालस्तामवदत् ईदृक् एवं रूपं कालवचः श्रुत्वा काली कालं प्राह। मायया
त्मानमाछाद्य स्वयं स्त्रीरूपधारिणी। इतः प्रभृति युगे युगे स्त्रीमात्रं भविष्यती
ति। वल्ल्याद्यौषधयः दिवा वल्लीस्वरूपतां प्राप्य स्थास्यन्ति रात्रौ स्त्रीरूपं प्राप्य
परस्परं क्रीडयन्ति स्त्रीरूपधारणं कृत्वेति भावः सर्वेषामस्त्रानं युगे युगे भ
विष्यतीति एवं शापं दत्वा कालिका पुनर्म्महाकालं प्रोवाच। विपरीतरतिं
कृत्वा ये मां चिन्तयन्ति। विपरीतरतिः परललना संसर्गरूपा। तेषां वरं प्रयच्छा
मि प्रदास्यामीति क्वचित्पाठः। तत्राहं नित्यं वसामि इत्युक्त्वा कालिका तत्रैवा
न्तरधायत अन्तर्ध्याना बभूव। ततो महाकालस्त्रिंशन्निखर्वषड्वृंदं नवस्य

६ र्बुदकोटयः संख्या यावत्तद्दर्शनार्थं तपस्तेपे। साप्रिया कुत्र गता सा देवी मम
प्राणप्रिया हा हेति खेदे। किं करोमि क्व गच्छामीत्येवं तन्मायया मोहेन भ्रमसं
कुलः भ्रमाक्रान्तोऽभूदिति ततो महाकाल्याः कृपा जाता शिवा मम चिन्तापरः॥
6 यंत्रप्रस्तारबुद्धिः काल्यास्तत्त्ववं दत्वा पुनस्तिरोधाना बभूवेति। ततस्तदा
रभ्यं यंत्रं जातं पूर्वं पूर्वं रूपं चिद्घनगोचरं चिदानंदं नित्यं घनो मे घस्त ऋ
चरा तद्रूपेति। ततः श्रीचक्रराजप्रस्तारवचनाभ्यासनतत्परोऽभूदिति। इतस्त
तो भ्राम्यमाणः सत्यं त्रैलोक्यं चक्रमध्यगतं ददर्श चक्रपारदर्शनार्थं तस्य को
घर्बुदपर्यन्तः कालो गतः। सा देवी भक्तानां प्राणप्रिया भक्तवत्सलेति याव
त्॥ महाश्रीचक्रस्य नायिका। अत्र बिन्दुः परं रूपं सुररं सुमनोहरं जातं विंदो ६

रिति पाठे तु विंदोः सकाशात् परं रूपं जातमिति। जाग्रत्त्रिपुरसुन्दरीति नामख्या
ता बभूवेति। तस्या रूपं दृष्ट्वा महादेवो राजराजेश्वरोभूदिति तत्कटाक्षमात्रेण
तद्रूपधरः शिवः सा देवी सुंदरी शृंगारं विना काल्या अंशतो जातेति एवं जगत्
स्थावरजंगमं काल्या अंशतो जातमिति हे महेश्वरि निःशृंगारणशक्तिर्लभना
प्नोति॥ काली सुंदर्य्या प्रार्थिता सती तुष्टा सोवाच॥ सर्वेषां नेत्रकेशेषु ममांशो
न विष्यति एवं पूर्वावस्थासु बाल्ययौवनादिकालेषु ममांशास्तिष्ठति॥ सावस्था
तरुणेति। तदन्ते वार्द्धक्ये न तिष्ठतीति मद्भक्तानां तु मातरूपणा वस्या सदा
बाल्ययौवनवार्द्धक्येपि तिष्ठती। तिशक्तिः। कुंठिनाम बतिरूपं च नसुन्दरमिति
इति कालीवचः श्रुत्वा सुन्दरी मचिन्ताविष्टा चिंतायुक्ता जाता चिन्तान्विता सती

मलिना बभूव ॥ चिन्तान्विता क्षणं स्थित्वा कालाचिन्तनतत्परा भूत् ॥ तदा काली
क्षणा ईनम सन्नाभूतवरं ब्रूहीति सादरं त्रिधा वदत् ॥ श्रीसुंदर्युवाच ॥ ॥ मम
परां श्रेष्ठां शक्तिं देहीति वरोयं मया प्रार्थितः येनोपायेन मम शक्तिर्भवति त
दुपायं कथय श्रीकाल्युवाच ॥ ॥ मया पूर्वं मम नाम सहस्रं विनिर्मितं तत्स
हस्रनाम मत्स्वरूपं ककारा ख्यं ककाराद्यमिति क्वचित्पाठः । महासाम्रा
ज्य नाम कं तदेव क्षणाद्वीद्वरदायकं च ॥ अतो वरदानाभिधमिति । वरदाना
माभिधा यस्य तत्तथा वरदाने वा अभिधायस्य अभिधानाम । तत्सहस्र नाम
हे महामाये पठ स्वतदा तव शक्तिर्भविष्यतीति श्रीविद्या ततः प्रभृतितत्सहस्र
नाम पाठतत्परा भवत् । तदेव नाम साहस्रं सुन्दरी शक्तिदायकं परया भक्त्या

ततस्सहस्रनामकथ्यते हे श्वरि तत् साधयस्व। मद्यैर्मांसैः शुक्रैः काली पूज
येत् वकुरकैश्च तर्पयेत् विपरीतरतिं चाचरेत्॥ विपरीतौ कामानित्यंति इती
ति॥ माधवीकेति माकिंतु तामाधवी कशुककपुष्पान्नमैथुने अतो स्वभावो य
त्नो वा यस्याः सा तथा। मैथुनाद्या इति पाठे तु मैथुनादौ आ सम्यक् विशेषो रा
गोऽनुरागो विद्यते यस्याः सा माध्वी कशुककपुष्पान्नमैथुनाद्या विरागिणी मै
थुनाद्या इति पाठे तु विरागिणीति विशेषणपदं भिन्नमिति विशेषोऽनुरागो
विद्यते यस्याः सा विरागिणी अर्थात् भक्तप्रीतिः सा पुनः कीदृशी स्तोत्रपदेना
चनपः। जपेन देवतानित्यं स्तूयमाना प्रसीदति इत्यादि दर्शनात् पुनः कीदृ
शी ब्रह्मानन्दपराब्रह्मत्वेन सदानन्दमयीति तथा च। श्रुतिः नित्यविज्ञानमा

नन्दं ब्रह्मेति। स्वशरीरात् प्रकल्पितभर्त्राज्ञाम्मुना सहविहाररूपानन्देन तो
८ षिता। पुनः कीदृशी योगीन्द्रहृदये आगारं निवासः स्थितिर्वा यस्याः सा योगी
4 न्द्रहृदयागारा सा। पुनः कीदृशी सदाशिवविपर्य्यया सदाशिवेन सह विपर्य्य
यो यस्याः। कदाचित् त्वं मम स्वामी कदाचित् त्वं सुतो ममेत्यादिदर्शनात्॥ अ
थवा विपर्य्ययः सदाशिवेन सह विपर्य्ययः विरोधोऽनुरागो यस्याः अर्द्ध
नारीश्वरत्वात्। दिवानिशिविपर्य्यया इति पाठे तु साधको निशि दिवा कर्त्तु
शक्नोति दिवाप्यपि निशं कर्त्तुं शक्नोति अतो दिवानिशि विपर्य्ययस्तन्मंत्रोपा
सकस्येवेति। साधकयोग्येति तु हासतीनतत्क्षणमेव प्रत्यक्षा भवतीति द
न्तमालया जपः प्रियो यस्याः दन्तमालया यो जपति स प्रियो यस्या इति वा खड्ग

हस्तैस्यादिविशेषविशिष्टः सन् साधकः मेधासाम्राज्यनामकं सहस्रनामस्तो
त्रं पठेदिति एतद्रूपेण पाठफलातिशयः सूचितः साम्प्रदायिकैः शुद्धाचारैः
शुद्धबुद्ध्यान्वितैः पठितव्यं। यथा दिव्यास्त्रैर्देवाः क्षणमात्रतः प्रसन्ना भवन्ती
ति तथा कालीपाठमात्रेण स्य प्रसन्ना भवतीति देवा इत्यत्र दिव्या इति पाठे
दिविभवा दिव्या देवा एव तुल्यार्थः। तस्या नामसहस्रं कथ्यते सावधानमनाः
शृणु। सर्वसाम्राज्यमेधाख्यनामसाहस्रिकस्य महाकालऋषिरुष्णिक्छंदः
हूं शक्तिः कालिका बीजं कामबीजं कीलकेन कामबीजेन षड्दीर्घाद्येन षडंगा
नि षडंगान्यासं कारयेत् कुर्यादित्यर्थः स्वार्थे णिच्प्रत्ययः न तु हेत्वार्थे एवं वध्या
नं कृत्वा करालवदनामित्यादि स्वेष्टसाधनं स्वकीयमिष्टसाधनं यस्मात्स्तोत्रात्

ष्टेष्टसाधनं तत् स्तोत्रं पठेति। अस्य श्रीसर्वसाम्राज्यमेधाकालीरूपककारात्म
कसहस्रनामस्तोत्रस्य महाकाल ऋषिरुष्णिक् छन्दो दक्षिणकाली देवता ह्रीं वी
जं हूं शक्तिः कामवीजं कीलकं कालीवरदानाद्याखिलेष्टसाधनपाठे विनियो
गः॥ ॥ॐ ह्रीमित्यादि। प्रणम्य कालीचरणारविन्दं ब्रह्मादिभिर्धेयमनन्तगु
णं। सहस्रनामस्तुतिरत्नदीकां तनोति तत्पादतले कचिच्चित्तः। क्रीं काली१
ककारात्तु जलोत्पत्ती रेफाद्वह्निर्जायते। ईकारात् पृथिवी जाता नादाद्वायुर
जायत॥ विन्दोराकाशमित्येवं पंचभूतात्मकं जगत्। इदमेव परं ब्रह्म त्वनन्तता
मिष्टदं शुभं॥ ककाराच्छिवरूपत्वान्निर्वाणपददायिनी। ज्वलनार्कसमायोगा
न्महातेजोमयी तथा। लक्ष्मीरूपा न थेकारात् सर्वसाम्राज्यदायिनी। ज्वलनार्क

समायोगाख्म हाने जोमयीतथा। लक्ष्मीरूपान्तथैकारात सर्वसाम्राज्यदायिनी॥
विन्दुनानिष्कलत्वाच्च कैवल्यपददायिनी दक्षिणासिद्धिसाध्यादिविहिताक्षिप्रसि
द्धिदा॥ वामरेखान वेदस्लाविष्णुर्दक्षिणरेखिका अधोरेखान वेदुद्रो मात्रासाक्षा
त्सरस्वती। कुं उला अंकुशाकारमध्यस्न्यांसदाशिवः। कदम्बगोलकाकारंक
कारंभावयेत्सुधीः। ककारस्यवक्रदेवताकत्वात सचराचराखिलब्रह्मांडव्याप्ते
यमितिप्रलये ब्रह्मादयोदेवाः स्थावरजंगमाद्याश्चसर्वेमहाकालेलीनाभवन्ति
। तंकालमसौसंपस्यकालीति। ऊँकराली २॥ विन्दुर्ब्रह्मेतिब्रह्मरूपासाप्टष्टि
स्थित्यादिकरणेच्छया ब्रह्मविष्णुशिवाग्न्यादिदेवानांप्रसूः कराली दन्तरेते भयं
करा। वापुड तथादर्शना। ह्रूँकरालीतिपाठेपितुल्यार्थः कवर्गस्यब्रह्माक्षरत्वात

१० पूर्णत्वं स्वलमयीतिभावः ॥ उकारस्य शिवरूपत्वात् शिवसहितेत्यर्थः शिवरूपशि
10 वोपरिसमासीनेतियावत् । कल्याणप्रदानात् । कल्याणी । ३ ॥ लक्ष्मीरूपत्वात् ॥
कमला ॥ ४ ॥ अमाकलारूपत्वात् कला ६ नित्यत्वात् लीलारूपाद्वेति । कलाव
ती ॥ ६ ॥ लीलावतीतियावत् । कलया लीलया आत्मा स्वेच्छादि हेतुत्वात् । कला
ढ्या ॥ ७ ॥ कलाभिः शक्तिभिः सह पूज्या कल्याणी ॥ कलापूज्या ८ कलाशक्तिस्त
दात्मिका । कलात्मिका । ९ ॥ कलया लीलया पुष्टा । कलापुष्टा । १० ॥ कलाहृष्टेति
पाठे कलया शक्त्या सहजपार्श्वनादौ हृष्टा शक्तियोगेन पूजयेदिति दर्शनात्
कलया लीलया हृष्टा । कलाहृष्टा । ११ कलारे हेति ॥ कलामस्ता । १२ ॥ नागमस्ते
ति । कलानागे कलाशक्तिः कलालीलाप्रकीर्तितेति रनसः । अथवा कलाचंद्राद् १०

कला सामस्त्ये यस्याः सा तथा चंद्रार्द्धकृत शेखरेति सर्वशक्तिस्वरूपेति यावत् कलास्या इच्छाशक्तिचांद्रयोरिति मेदिनी। कला करा ॥२३॥ कलाशवमुंडः खर्परो वा को यस्याः सा तथा। खर्परि शवमुंडे च कालाभेदे स्मृता कलाइतिविश्वः। शवमुंडे तथा नाग खर्परे शक्तिचांद्रयोः। विलासे मिश्रिते हास्ये कला कामेश्वरकीर्तितेति रत्नकोषः॥ कलाकोटिसमाभासा॥२४॥ चंद्रकोटिसमाभासेति। कलाकोटिप्रपूजिता॥२५॥ कलाकोटिभिः शक्तिकोटिभिः सम्पूजिता अथवा सन्ति योगिनी॥ अथवा बहुशक्तिसुतः साधकः पूजां जपादिकं कुर्य्यादिति॥ कलामयी॥२६॥ सर्वशक्तिमयी कलात्मककालमयी वा। कलाशिल्पे कालभेदे दस्त्वमरः॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनीति मार्कंडेयपुराणाच्च काले

११ त्वुपलक्षणांस्थूलसूक्ष्मात्मकसर्वकालस्वरूपासेवेति ॥ कलाधारा ॥ १७ ॥ कला
सु शक्तिस्वाधारेऽधिष्ठानं यस्याः सा तथा कलालीला अपारा असंख्येया यस्याः
सा ॥ कलापारा ॥ १८ ॥ कलाभिः चालाभिः शक्तिभिः सहमता पूजिता सा ॥ कला
मता ॥ १९ ॥ कलासारा ॥ २० ॥ कलाप्राप्तिः सारः स्थिरांशः प्रधानो यस्याः सा त
था पूजानपसाधनादिषु शक्तेः प्राधान्यमिति ॥ शक्तियुक्तो भवेन्मर्त्यः सिद्धो भव
ति नान्यथेति तंत्रात् कमलिनी ॥ २१ ॥ कमलपुष्पजोऽष्टोत्तद्वि[illegible]शिष्टा वेति रू
पभेदेन पद्मासनस्थेति ॥ ककारा ॥ २२ ॥ ककारवर्णमयी एतेन प्रकृतिपुरुषा
त्मकसर्वदेवतामयीति भावः ॥ अथवा ककारस्य ब्रह्माक्षरत्वात् पूर्णब्रह्मम
यीति करुणा ॥ २३ ॥ दयारूपेति ॥ करी ॥ २४ ॥ ब्रह्मविष्णुशिववह्निलक्ष्मीसरस्व ११

तासदाशिवरूपेति एतदर्थः पूर्वोक्तः करा इति पाठेति तस्यार्थः आकारस्य प्र

चंडत्वाकत्वात्प्रचंडरूपेति॥ ककारवर्णसर्वांगी॥२६॥ ककारोऽत्रस्त्राक्षरः त

द्वर्णात्मकसर्वशरीरं यस्याः सा तथाऽत्रस्त्रविग्रहेति यावत्॥ कलाकोटिवि भू

षिता॥२६॥ शक्तिकोटिभूषितेति॥ ककारकोटिगुणिता २७॥ ककारस्य को

टिजपेन गुणिता सिद्धिरेति। ककारकोटिभूषणा॥२८॥ ककारकोटिभिः शक्ति

कोटिभिर्भूषणं यस्याः सा तथा योगिनीकोटिपरिवृतेत्यर्थः॥ ककारवर्णहृद

या॥२९॥ ककारवर्णो हृदये यस्याः सा तथा॥ ककारसनुमंडिता॥ ३०॥ ककार

वर्णात्मकमंत्रमंडिता॥ ककारवर्णमुकुटा॥३१॥ ककारवर्णात्मकमुकुटो

यस्याः सा तथा। ककाराम्बरभूषिता॥३२॥ अत्र ककारो वायुः स एवाम्बरं यस्याः

दिगम्वरीतिपावत्॥ कोभ्रस्तगिसमीरात्मयक्ष्मदक्षेषुभास्करे॥ मयूरेऽग्नौ च पुंसि
१२ स्यात् मुखशीर्षजलेषु कमित्यमरः॥ ककः ककोवर्णरूपा॥ ३३॥ तद्वर्णरूपेति।
ककः कंकवर्णरूपेतिपाठेपितुल्यार्थः॥ ककः शब्दंप्रकुर्वाणा। सविसर्गः ककः
क्वचित् पाठः। ककः शब्दपरायणा॥ ३४॥ ककशब्दपरेयणेतिक्वचित् पाठः
॥ ककवीणास्फालरता॥ ३५॥ ककशब्देनवीणास्फालनरतासातथा॥ कंकवीण
स्फालरतेतिपाठे कंकशब्देनवीणास्फालनरतेत्यर्थः॥ कमला॥ ३६॥ लक्ष्मीरू
पेति॥ करपूजिता॥ ३७॥ करैर्ब्रह्मविष्णुशिवयमसूर्यवायवग्न्यादिभिः पूजिता॥
कमलाकरनाथाच॥ ३८॥ कमलाकरः समुद्रस्तस्यनाथाईश्वरी॥ कमलाकररू
पधृक्॥ ३९॥ कमलाकरः समुद्रस्तद्रूपधृक्समुद्ररूपिणीति॥ कमलाकरप्रि २२

ष्टिस्या ॥४०॥ कमलाकरो विष्णुस्तस्य सिद्धौ स्थास्थितिर्यस्याः सा तथा ॥ कम
लाकरपूजिता ४१ कमलाकरेण विष्णुना समुद्रेण वा पूजिता। कमलाकरस्य
संसाररूपस्य समुद्रस्य पारं ददातीति कमलाकरपारदा इति केचित् अर्थान्मंत्र
स्य फलेपुनर्जन्म न भवतीति भावः कमलाकरमध्यस्था ४२ कमलाकरस्य
विष्णोर्मध्ये हृदये तिष्ठतीति। अथवा कमलाकरस्य समुद्रस्य मध्ये तिष्ठतीति
।कमलाकरतोषिता ४३॥ कमलाकरेण विष्णुना समुद्रेण वा तोषिता सा तथा॥
कथंकारपरालापा ॥४४॥ कथंकारपर आलापो यस्याः सा तथा। कथं[redacted]कारप
रायणा ४५॥ कथंकारः कथमिति शब्दोच्चारणे परायणा तुष्टेति॥ कथंकारपदान्त
स्था ॥४६॥ कथंकारपरस्यान्ते स्थास्थितिर्यस्याः सा तथा। कथंकारपदार्थभूः॥४७॥

कथंकारपरार्थेन भवतीति। कमलाक्षी॥४८॥ पद्मलोचनेति॥ कमलजा॥४९॥ अं
१३ शक्रमेण पद्मजेति॥ कमलाक्षप्रपूजिता ५०॥ कमलाक्षेण विष्णुना प्रपूजिता
१३ ॥ कमलाक्षवरोद्युक्ता॥५१॥ कमलाक्षो विष्णुस्तस्य वरदानाय उद्युक्ता उद्यतेत्य
र्थः॥ ककारा॥५२॥ ककाराक्षररूपा परमब्रह्मरूपेति भावः॥ कर्बुराक्षरा॥
५३॥ कर्बुराक्षरो वर्णो यस्याः सा तथा अंशांशेन रूपभेदादिति अथवा कर्बुरः क
र्बुरा वर्णा चासौ अक्षरा ब्रह्मरूपा चेति कर्बुराक्षरा॥ करतरो॥ करे ताराः ब्रह्म
यस्याः सा तथा अर्थात्साधकानामिति॥ करछिन्ना॥५५॥ करेण छिन्नौ यस्याः सा
तथा छिन्नं शिवः शवसुंदरस्यर्थः॥ करश्यामा॥५६॥ करेण तेजसा श्यामा श्याम
वर्णा॥ करार्णवा॥५७॥ करे अर्णवः समुद्रो यस्याः सा तथा नानारूपधारणादि १३

ति ॥ करपूज्या ॥ ५७ ॥ करे एणते । जोम यत्त्वेन पूज्या अन्तर्यजनविशेषइतिभावः ।
कररता ॥ ५८ ॥ करस्ते जोब्रह्मरूपः शिवः स्वकीयांगसम्भवस्तस्मिन्रता ॥
करदा ॥ ६० ॥ करंतेजोददातीति साधकेभ्यइतिभावः ॥ करपूजिता ॥ ६१ ॥ करैः
स्वतेजोविनिर्गतैर्ब्रह्मविष्णुशिवैः पूजिता ॥ करतोया ॥ ६२ ॥ करेतोयंअभयं
यस्याः सातथा । अनया शुष्कीरवायुत्राणेषु तोयमारितं इतिशब्दमहार्णवः ॥
करामर्षा ॥ ६३ ॥ करस्यतेजसआमर्षः प्राप्तिर्यस्याः सा । करनासा ॥ ६४ ॥ करो
हस्तो नसि नासिकायां यस्याः सामूर्त्तरध्यानेनथादर्शनात्करनासाइत्यत्र
कर्म्मनाशेति पाठे कर्म्मणां पापरूपकर्म्मणां नाशो यस्याः सातथेति । करप्रि
या ॥ ६५ ॥ करस्तेजोरूपमयः शिवःप्रियोयस्याः सातथा । करप्राणा ॥ ६६ ॥ कर

१४ स्यमहादेवस्य प्राणा अथवा करो महादेवः प्राणो यस्याः सा तथा। करंजा॥ ६७॥ ते
15 जः सत्त्वा महिषासुरयुद्धे तथा दर्शनात्॥ करका॥ ६८॥ बिन्दुरूपा हिमरूपा वे
ति॥ करकान्तरा॥ ६९॥ करका बिन्दुर्गोलरूपस्तदन्तरा तन्मध्यस्था शून्यब्रह्मा
उ गोलस्थेति यावत्॥ करकाचलरूपा च॥ ७०॥ करकाचलो हिमाचलस्तद्रूपं य
स्याः सा तथा। करकाचलशोभिनी॥ ७१॥ करकाचलं शोभिनं शीलं यस्याः सा। कर
काचलपुत्री च॥ ७२॥ हिमालयपुत्रीति। करकाचलतोषिता॥ ७३॥ करकाचलो हि
मालयः सा तोषितो यया सा। करकाचलगेहस्था॥ ७४॥ तद्गृहस्था। करकाचल
रक्षिणी॥ ७५॥ करकाचलं रक्षिनं शीलं यस्याः सा तथा। करकाचलसम्मान्या ७६
॥ तेन सम्मान्या पूजनीयेति॥ करकाचलकारिणी॥ ७७॥ करकाचलं हिमाचलरू १४

पंकरूं शालं यस्याः सा तथा अर्थात् साधकोप्यः पर्वततुल्यश्चुरंतवधनदानात् हि
मशब्दोत्रधनवाचकोवेति। करकाचलवर्षात्या॥७८॥ करकाचलवद्धनवर्षेणे
ना त्था साधका यस्याः सा। करकाचलरंजिता॥७९॥ करकाचलेनरंजिता॥ कर
काचलकान्ता वा॥८०॥ करकाचलस्य हिमालयस्य कान्ता रामयनाशिनी। कान्ता
रोगद्रनेश्रोक्तो मयहानोत्रिलिंगकः इतिशब्दमहार्णवः। करकाचलमालिनी॥८१
नृमुंडमालिनी। असुरमुंडमालिनी वेत्यर्थः॥ नृमुंडे, सुरमुंडे च पर्वते करकाचल
इतिरत्नाकोधः। करकाचलभोज्या च॥८२॥ करकाचलवद्भोज्यंभोजनं यस्याः सा त
था पर्वतप्रमाणद्रव्यभोजनार्हा इति यावत् इत्युपलक्षणं अखिलब्रह्माण्डग्रासो
पयात्क्रियते तस्याः पर्वतप्रमाणं भोजनं तुच्छमिति॥ करामलकरूपिणी॥८३॥ क

१५ रे अमलकं निर्मलत्वं यस्याः सा तथा॥ करामलकसंस्था॥८४॥ करामलके तिष्ठति
इति॥ करामलकसिद्धिदा॥८५॥ करामलके न सिद्धिं ददातीति। करामलका यद्वा
15 ।करामलकसंपूज्या॥८६॥ तेन सर्वपूज्येति॥ करामलकतारिणी॥८७॥ तेन ता
रितुं शीलं यस्याः सा॥ करामलकवाणी च॥८८॥ करामलकवाणी यस्याः करे आ
मलकं देहीति वाणीं साधकान् वदतीति भावः॥ करामलकरोचिनी॥८९॥ करा
मलकं रोचितुं शीलं यस्याः सा तथा॥ करामलकमाता च॥९०॥ करे अमलकं
पश्यतस्य माता मातृवत् पालतीत्यर्थः करामलकसेविनी॥९१॥ करामलकं
धनं अर्थाद्धनादिभिः सेवितुं शीलं यस्याः सा तथा। करामलकासवनीति पाठे क
रामलकसेवनी सेवाकर्त्र्येति॥ करामलकवन्द्या॥९२॥ करामलकरद्वध्ये १५

यासाधकेरिति॥ करामलकमध्यस्था इति पाठे तन्मध्यस्था अपाधिष्ठानेत्य
र्थः। करामलकदायिनी॥९३॥ करे मलनको यस्य स करामलकस्तस्मै अर्था
त्सिद्धिं धनादिकं वा दातुं शीलं यस्याः सा तथा। अथ सिद्धो करामलक इति प्र
सिद्धः। करामलाद्यविशेषं इति वा॥ कंजनेत्रा॥९४॥ कं जले जातं कंजं पद्मं
कंजमिव नेत्रं यस्याः सा कंजनेत्रा पद्मलोचनेति। कंजगतिः ९५॥ कंजं पद्मे ग
तिः स्थितिर्यस्याः सा॥ कंजस्था॥९६॥ कंजे तिष्ठति या सा। कंजधारिणी ।९७॥
पद्मधारिणीत्यर्थः स्वपद्मे दात् लक्ष्मीरूपेति। कंजमालाप्रियकरी॥९८॥ पद्म
मालाप्रियकरीत्यर्थः॥ कंजरूपा॥९९॥ तत्राधिष्ठानादिति॥ कंजजा॥१००॥ पद्म
जेति मूर्तिभेदात्॥ कंजजाति॥१०१॥ पद्मरूपेति॥ कंजगीतिः॥१०२॥ कंजे गीतिर्गी

१६ नं यस्याः सा अतिप्रियत्वादिति कंजरोमपरायणा ॥१०३॥ पद्मरोमतुष्टेति। कंज
मंडलमध्यस्था ॥१०४॥ पद्मवनमध्यस्थेति ॥ कंजाभरणभूषिता ॥१०५॥ पद्मा
16 लंकृतेति ॥ कंजसम्माननिरता ॥१०६॥ पद्मदानेन सम्मानप्रदायिनीत्यर्थः ॥ कं
त जोत्पत्तिपरायणा ॥१०७॥ प्रीतेत्यर्थः ॥ कंजराशिसमाकारा ॥१०८॥ पद्मसमू
हाकृतिः ॥ कंजारण्यनिवासिनी १०९॥ पद्मवनस्थेति भावः ॥ करंजवृक्षमध्य
स्था ॥११०॥ करंजो वृक्षविशेषस्तत्राधिष्ठानेति भावः करंजवृक्षवासिनी ॥१११॥
तद्वृक्षेवस्तुं शीलं यस्याः सा ॥ करंजफलभूषाढ्या ॥११२॥ करंजारण्यवासिनी ११३॥
करंजमालाभरणा ॥११४॥ एतेस्पष्टार्थाः ॥ करवालपरायणा ॥११५॥ करवालोस्त्र
विशेषः तत्परायणा तस्मिन्तुष्टेत्यर्थः ॥ करवालप्रहृष्टात्मा ॥११६॥ करवालेप्र १६

र्द्ध आत्मा स्वभावो यस्याः सा॥ करवालप्रिया गतिः॥१८७॥ करवालप्रियं छुरिकात
स्मात् स्थितिर्यस्याः सा तथा। अथवा करवालप्रिया शस्त्रादीनां धारा तस्यां स्थिति
र्यस्याः शस्त्रास्त्रादीनां धाराधिष्ठानेतिभावः। करवालप्रियकरा॥१८८॥ करवाल
स्यासौ प्रिय श्चेति करवालप्रियः स करो यस्याः सा॥ करवालप्रिया कन्था इति पाठे
कंथा कटिदेशस्येति॥ एतवस्त्रे स्मृता कंथा कटिदेशेपि कीर्त्तितेशब्द संग्रहा
र्णवः। करवालप्रहारिणी॥१८९॥ करवालेन प्रहर्त्तुं शीलं यस्याः सा॥ करवालमयी
कर्म्मा॥१९०॥ करवालमयी च सा कर्म्मरूपा चेति कर्म्मधारयः। करवालप्रियाकरा
॥१९१॥ करवालप्रियायां आकरो नुरागः स्थितिर्यस्याः सा करवालप्रिया छुरिकार
यः॥ कवंधमालाभरणा॥१९२॥ कवंधमाला आभरणं यस्याः सा तथा॥ कवंधराशि

१७
17
मध्यगा ॥१२३॥ कबंधानां राशिः समूहस्तन्मध्यगा कबंधमध्यवर्त्तिनीत्यर्थः ॥ कबंध
कूटसंस्थाना ॥१२४॥ कबन्धानां कूटसमूहे संस्थानं स्थितिर्यस्याः सा तथा ॥ कबं
धनन्दभूषणा ॥१२५॥ कबन्धनादसन्तुष्टा ॥१२६॥ कबन्धासनधारिणी ॥१२७॥ कबं
धासने साधकः सिद्धो भवतीति फलिताः कबंधगृहमध्यस्था ॥१२८॥ यस्मिन्
कबंधसमूहमध्यस्थेति गृह इत्युपलक्षणं यत्र स्थाने कबन्धस्तत्राधिष्ठानेति
भावः कबन्धवनवासिनी ॥१२९॥ सुगमार्था ॥ कबंधकांचीकरणी ॥१३०॥ कबंध
कांचीयुतं करणं गात्रं अर्थात् कटिदेशो यस्याः सा ॥ करणं साधकतमक्षेत्रगा
त्रेंद्रियेष्वपीत्यमरः ॥ कबंधशशिभूषणा ॥१३१॥ कबंधः कं शिरस्तस्मिन् बधः संल
ग्नः शशी भूषणं यस्याः सा तथा कबंधाबद्धशशीभूषणं यस्याः सा तथा ॥ कबंधमा १७

लाजपरा॥१३२॥कबंधमालयाजपेनसिद्धिदानात् कबंधदेहवासिनी॥१३३॥क
बंधदेहेवस्तुंशीलंयस्याःसा गेहवासिनीतिकचित्पाठः कबंधासनसम्मान्या
॥१३४॥कबंधासनेमाल्यापूजायस्याःसा॥कपालमाल्यधारिणी॥१३५॥कपालमा
लामध्यस्या॥१३६॥कपालोनरमुंडेनरकपालस्वतन्मालयाजपःप्रशस्तः अस्थि
माल्याधिष्ठानेतिभावः॥कपालव्रततोषिता १३७॥कपालव्रतःशिववस्तेनतो
षिता कपालस्थोजपार्चादिकरणेयस्यव्रतंनियमः स साधकस्तोषितोययाध
नादिभिरर्थादितिवा।कपालदीपसन्तुष्टा॥१३८॥नरकपालेदीपदानेसन्तोषाति
शयात्। कपालदीपरूपिणी॥१३९॥तत्राधिष्ठानेत्यर्थः॥कपालदीपवरदा१४०॥
नरपालोयोदीपंददातितस्मैवरदेतिभावः। कपालकज्वलस्थिता॥१४१॥नरकपाले

१८ 18
पुः कज्वलस्त्रचर्षिता ॥ अन्नादिति क्वचित् पाठः । कपालमालाजपदा ॥१४२॥ कपा
लमालयाजपेनसिद्धिदा नादिति भावः ॥ कपालजपतोषिणी ॥१४३॥ कपाल
सिद्धिसन्तुष्टा ॥१४४॥ कपालभोजनोद्यता ॥१४६॥ कपालव्रतसंस्थाना ॥१४७॥
कपालकमलालया ॥१४७॥ कवित्वामृतसारा च ॥१४८॥ कवित्वामृतसाएन
वत्यस्याः सा तथा ॥ कवितामृतसागरा ॥१४९॥ कवित्वामृतसागरोन वत्य
स्याः सा तथा कवित्वसिद्धिसंहृष्टा ॥१५०॥ सस्मेति ॥ कवित्वदानकारिणी ॥१५१
॥ कवित्वदानं कर्तुं शीलं यस्याः सा तथा ॥ कविपूज्या ॥१५२॥ कवीनां पूज्येति ॥
कविगतिः ॥१५३॥ कवीनां गतिर्यस्याः सा ॥ कविरूपा ॥१५४॥ स्वयमेवेति ॥ क
विप्रिया ॥१५५॥ कविः पंडितः प्रियो यस्याः कविब्रह्मानन्दरूपा ॥१५६॥ कवीनां १८

परमानन्ददानात्॥ कवित्वव्रतभूषिता॥ १५७॥ कवित्वेन यः स्तोतीति यस्य
व्रतं नियमः भूषितायथा धनादिभिरर्थात्। कवित्वव्रतभूषिणीति पाठेपितु
त्यर्थः॥ कविमानससंस्थाना॥ १५८॥ कवीनां मानसे हृदये संस्थानं स्थितिर्य
स्याः अथवा कवीनां पंडितानां साधकानां वा भक्तानामिति फलितार्थः। कविवां
छाप्रपूरणी॥ १५९॥ कविकंठस्थिता॥ १६०॥ कंठी॥ १६१॥ स्पष्टार्थः॥ कं ह्रीं हूं
कंकं कविपूर्णदा॥ १६२॥ कं ह्रीं हूं कं कं इत्युच्चारणात् कवीनां पूर्णमनोरथप्र
दानात् पूर्त्तिदेति पाठेपि तुल्यार्थः॥ कज्जला॥ १६३॥ कज्जलवर्णेति॥ कज्ज
लानंदमानसा॥ १६४॥ कज्जलेनानंदं मानसं यस्याः सा तथा॥ कज्जलप्रि
या॥ १६५॥ कज्जलः प्रियोयस्याः सा कज्जलतुष्टेत्यर्थः। कपालकज्जलसमा १६६

संवत्सरपर्य्यन्तः प्रीतेत्यर्थः कपालानां कपालनः॥ कम्बले शम्भु पूजिता॥ १६७॥
१६॥ कम्बले शोमहादेवस्तेन प्रपूजिता॥ कम्बलानार्णवमध्यस्था॥ १६८॥ सर्व कम्बल
दानेन तुष्टेति भावः॥ कम्बलानन्तरूपिणी॥ १६९॥ कम्बले अनन्तरूपि
णी सूक्ष्मरूपेणाप्यितेति॥ अथवा कम्बुलोमहादेवः अनन्तो विष्णुः शिवबि
ष्णुरूपिणीत्यर्थः॥ तस्या अंशजातत्वात् ब्रह्मविष्णुमहेशाद्याः पं रूपा॥ अंश
सम्भवाः इति निर्गुणप्रदीपतंत्रात् कम्बलप्रियसन्तुष्टा॥ १७०॥ कम्बलप्रियः
शिरस्तस्मिन् तुष्टा मेन वेति कम्बलप्रियतोषिणी॥ १७१॥ कम्बलप्रियं विष्णुं तो
षयितुं शीलं यस्याः सा॥ कपालमालाभरणा॥ १७२॥ कपालमाला आभरणं
यस्याः सा॥ कपालकरभूषणा॥ १७३॥ कपालेन करभूषणं यस्याः सा॥ कपा १६